International Journal of Trend in Scientific Research and Development, Volume 1(4), ISSN: 2456-6470
www.ijtsrd.com

# षड्वेदाङ्ग–विमर्श

**डॉ. मोहन मिश्र**

युनिवर्सिटी प्रोफेसर, संस्कृत विभाग, ति०माँ०भा० विश्वविद्यालय, भागलपुर

संस्कृतसाहित्ये वेदानां महत्त्वं स्वयंसिद्धम्। वेदाः भारतीयानां कृते जीवनाधायकाः प्रकाशस्तम्भाश्च। वेदानां सम्यगर्थावबोधनाय वेदाङ्गानि प्रवृत्तानि। तानि च षट् – शिक्षा–कल्प–निरुक्त–छन्दः–ज्योतिष–व्याकरणमिति। छन्दः वेदस्य पादौ, कल्पः हस्तौ, ज्योतिष चक्षुः, निरुक्त–श्रोत्रं, शिक्षा–घ्राणं व्याकरणं च मुखमिति स्वीकरोति पाणिनीय शिक्षाकारः।[1]

शिक्षा वेदस्य घ्राणमिति मन्यते। शिक्ष्यते वर्ण–स्वराद्युच्चारणविधि यया सा एव शिक्षा। यथोक्तं तैत्तिरीयोपनिषदि 'वर्णः स्वरः मात्रा बलं साम सन्तानः इत्युक्तः शिक्षाऽध्यायः। तत्र वर्णोऽकारादिः स्वराः उदात्तानुदात्तस्वरिताः, मात्रा ह्रस्वदीर्घप्लुताः, बलं स्थान–प्रयत्नौ, साम साम्यं दोषरहितं मधुर्यादिगुणयुक्तमुच्चारणम्, सन्तानः संहिता, पदानामतिशयसन्निधिः संहिता, सन्तानः मन्त्रोच्चारणे उपयुक्तः एषां मन्त्रोच्चारणार्थं अर्थबोधाय शिक्षायाः प्रयोजनम्। यद्यपि अद्यत्वे कतिपय–शिक्षा–ग्रन्थाः उपलभ्यन्ते परं पाणिनीय–शिक्षायाः एव प्रामाण्यङ्गीकुर्वन्ति विद्वांसः।
कल्प्यते समर्थ्यते यज्ञयागादिप्रयोगाः यस्मिन् तत् कल्पसूत्रम् कर्मकाण्ड–विधिविषयकाः ग्रन्थाः कल्पसूत्रेति पदेन व्यपदिश्यन्ते। एतेन श्रौत्रसूत्राणां, गृह्यसूत्राणां, धर्मसूत्राणां च पारिभाषिकी संज्ञा कल्पसूत्रमिति। तत्र शांखायनमाश्वलायनञ्च द्वे श्रौतसूत्रे ऋग्वेदीये। कात्यायनं शुक्लयजुर्वेदीयम्। कृष्णयजुर्वेदस्य षट् श्रौतसूत्रग्रन्थाः उपलभ्यन्ते। बौधायनश्रौतसूत्रम्, आपस्तम्ब, सत्यासाढ, वैखानस, भारद्वाज, मानव श्रौतसूत्रञ्चेति।

गृहस्थानां जन्मप्रभृति मृत्यु–पर्यन्ताः ये संस्कारा येषु विविच्यन्ते तानि गृह्यसूत्राणि। शुक्लयजुर्वेदीयं पारस्करगृह्यसूत्रम्, इदं सूत्रं वाजसनेयिसूत्र–नाम्नापि प्रसिद्धम्। कृष्णयजुर्वेदस्य सप्तगृह्यसूत्राणि उपलभ्यन्ते, आपस्तम्ब–गृह्यसूत्रम्, हिरण्यकेशी, भारद्वाज, बोधायन, मानव, काठक, वैखानसगृह्यसूत्रञ्चेति। कृष्णयजुर्वेदस्य श्रौत्रसूत्राणां गृह्यसूत्राणां च नामसाम्येऽपि, विषयसाम्येऽपि लेखकानां भेदः।

धर्मसूत्रेषु आपस्तम्बीयं–हिरण्यकेशीयं–पञ्चेति प्रसिद्धानि उपलभ्यानि च धर्मसूत्राणि सन्ति। येषु लौकिकाचारविचारव्यवहारादीनां, चतुर्णामप्याश्रमाणां भोज्याभोज्यपदार्थानां, दायाधिकारदण्डनियमादीनां वर्णनं विद्यते।

वेदार्थज्ञानाय निरुक्तस्य अध्ययनं परमावश्यकमिति। निरुच्यते निःशेषेणोपदिश्यते निर्वचन–विषयः यस्मिन् तत्, पदविभाग–मन्त्रार्थ–देवताविषयनिरूपकं शास्त्रम् तच्च निरुक्तं पञ्चविधमुक्तं हरिकायाम् –

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्॥

एतत् च द्वादशाध्यायात्मकं नैघण्टुक–नैगम–दैवतैः त्रिभिः काण्डैरुपनिबद्धम्।

यथा पादौ विना पदात् पदमपि चलितुं न शक्यते, तथैव छन्दो–विना वेदार्थज्ञानमसम्भवम्। तथा हि उच्यते – छन्दः पादौ तु वेदस्य इति। कुत्रचित् च छन्दसां यति–विरामादि–चिह्नानां विपर्ययात् अर्थस्य अनर्थो जायते। न केवलं वेदे एव परमार्यभाषायामपि विरामादि–विपर्यये अनर्थो जायते। छन्दसां लौकिक–वैदिक–भेदेन द्वैविध्यम्। यद्यपि बहवः छन्दोग्रन्थाः उपलभ्यन्ते, परमार्षत्वात् पिङ्गलाचार्य–प्रणीतं पिङ्गलसूत्रमिति ग्रन्थरत्नं प्रामाणिकम्। तच्चाष्टभिरध्यायैः उपनिबद्धम्। तत्र द्वितीय–तृतीयाध्याये वैदिक–छन्दसां विवेचनं विद्यते।

ज्योतिषं तु कालज्ञापकं शास्त्रम्। यागादिक्रियाकलापकलनाय मुहूर्तज्ञानम् आवश्यकम्। प्रति वेदं पृथगेव ज्योतिषशास्त्रम् अष्टादश महर्षयोऽस्य शास्त्रस्य प्रवर्त्तकाः सन्ति। अस्य शास्त्रस्य त्रीणि वर्त्मनि तस्मात् त्रिस्कन्धमुच्यते शास्त्रमिदम्। फलितज्योतिषं गणितज्योतिषं च द्विविधम्। फलादेशे सामुद्रिक–शास्त्रस्य अतीव महत्त्वम्। पृथ्वी–नक्षत्र–चन्द्रादीनां गतिविधौ गणितस्यातिमहत्त्वं वर्तते। अङ्कगणितं बीजगणितञ्चेति द्वयपि ग्रहविज्ञानस्याङ्गभूतम्। ग्रहतन्त्रस्य प्रणेतारः आर्यभट्टः, ब्रह्मगुप्तः भास्कराचार्यश्चेति इमे त्रयो विद्वांसः परमप्रसिद्धाः। शास्त्रमिदं यज्ञप्रक्रियासु बहुतरं साहाय्यमाचरति। ज्यामितिशास्त्र–त्रिकोणमिति–तन्त्रमपि वेदाङ्गभूतमिति।

व्याकरणं तु मुखमेव स्मृतम्। व्याकरणस्य प्रयोजनम् उद्दिश्य आचार्यवररुचिः इत्थं व्याचष्टे – रक्षोहागमलघ्वसन्देहाः प्रयोजनम्। तत्र वेदानां रक्षार्थमध्येयं व्याकरणम्। लोपागमवर्ण–विकारज्ञो हि सम्यक् वेदान् परिपालयिष्यति वेदार्थञ्चध्यंवस्यति। ऊहः खल्वपि न सर्वैर्लिङ्गैः न च सर्वाभिः विभक्तिभिः वेदमन्त्राः निगदिताः ते चावश्यं यज्ञगतेन विपरिणमयितव्याः। तान्नाऽवैय्याकरणः शक्नोति यथायथं विपरिणमयितुम्। तथा हि शतपथब्राह्मणे "अन्वेनं माता मन्यतामनुपितानुभ्राता इति" प्राकृतः पशुविषयः मन्त्रपाठः, तस्य विकृतौ पशुद्वये सति अन्वेनौ माता मन्यताम् इत्यूहः। पशुबहुत्वे सति अन्वेनान् माता मन्यताम् इत्यूहः कर्त्तव्यः तच्च

नावैय्याकरणः विपरिणमयितुं शक्तः तस्मात् मन्त्रार्थ–ज्ञानायाध्येयं व्याकरणम्।

सुसंस्कृता भाषा शब्दसाधुत्वमपेक्षते। साधुशब्दा हि प्रयुज्यमानाः यथार्थमर्थमर्पयन्ति नासाधुशब्दाः, साधुशब्दप्रयोगे तु व्याकरणाध्ययनं हि प्रधानं निदानम्। न हि व्याकरणज्ञानशून्यः साधुशब्दान् प्रयोक्तुं क्षमः।

समीक्षणोपरान्तमिति दृश्यते यत् वेदाङ्गानाम् ज्ञानं तु अपरिहार्यम्। वेदरक्षार्थं वेदाङ्गानां ज्ञानमपि अत्यपेक्षा नात्र किञ्चित् सन्देहलेशः। शमिति।

**पादटिप्पणी –**

[1] पाणिनीय–शिक्षा, 41–42
छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥